# 2020

## SANSKRIT — GENERAL

### Paper : DSE-A2

### (Indian Perspective in Personality Development)

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Day 1**

**Section - B**

1. अधोनिर्दिष्टेषु ***कस्यचिदेकस्य*** उत्तरं संस्कृतभाषया देवनागरलिप्या च दातव्यम्।

(a) अर्जुनविषादयोगनामके प्रथमेऽध्याये अर्जुनस्य विषादः कथमभवत् इति सप्रमाणमालोच्यताम्। 10

(b) क्षेत्रक्षेत्रज्ञयोः किं तावत् स्वरूपम्? तयोर्विज्ञानात् को लाभ इति गीतादिशा विचार्यताम्। 4+6

(c) का प्रकृतिः? कश्च पुरुषः? गीतोक्तदिशा प्रकृतिपुरुषयोः तात्पर्यं विचार्यताम्। 2+2+6

2. अधोलिखितेषु ***पञ्च प्रश्नाः*** संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5

(a) कौरवाणां सेनापतेः नाम किम्? पाण्डवानाञ्च क आसीत् सेनापतिः?

(b) श्रीकृष्णनादितस्य शङ्खस्य नाम किम्? अर्जुननादितस्य च शङ्खस्य नाम किम्?

(c) गीतायाः त्रयोदशतमस्य पञ्चदशतमस्य चाध्यायस्य नाम किम्?

(d) किं तावत् सविकारक्षेत्रमुच्यते?

(e) प्रकृतितः किं किमुत्पद्यते?

(f) कार्यकारणकर्तृत्वे कः हेतुः? कश्च तावत् सुखदुःखानां भोक्तृत्वे हेतुः?

(g) गीतायाः त्रयोदशतमाध्याये व्यक्तं देहस्थपरमपुरुषस्य स्वरूपं किम्?

(h) 'पचाम्यन्नं चतुर्विधम्'— इत्यत्र किं तावत् चतुर्विधमन्नम्?

3. अधोलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः वङ्गभाषया आङ्गलभाषया वा कार्यः। 5×2

(a) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।।

(b) पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु।।

(c) शरीरं यदवाप्नोति यश्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्।।

(d) इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।।

## Section - C

**4.** अधोलिखितेषु ***द्वयोः*** टीका कार्या। 4×2

सात्त्विकः यज्ञः, राजसं दानम्, त्रिविधा श्रद्धा, आसुरी तपस्या।

**5.** अधोलिखितेषु ***कस्यचिदेकस्य*** प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 7×1

(a) तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।

(b) लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ।।

(c) यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।।

## Section - D

**6.** अधस्तनेषु ***द्वयोः*** प्रश्नयोः उत्तरं प्रदातव्यम्।

(a) इन्द्रियाणि कथं मनः हरन्ति? तत्र इन्द्रियसंयमोपायः आलोच्यताम्। 2+3

(b) 'योगक्षेमं वहाम्यहम्'— कस्योक्तिरियम्? उक्तेरस्याः किं तात्पर्यम्? 1+4

(c) व्यवसायात्मिका अव्यवसायात्मिका च बुद्धिः का? इति गीतोक्तदिशा विचारणीया। 2½+2½

(d) 'कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः'— उक्तेः तात्पर्यम् आलोच्यताम्। 5

**7.** निम्नलिखितेषु ***द्वयोः*** श्लोकयोः अनुवादः कार्यः वङ्गभाषया आङ्गलभाषया वा। 5×2

(a) न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।

(b) यदा सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तामाहुः पण्डितं बुधाः।।

(c) अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम्।।

(d) श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्।।

———————